उपशास्त्री -I साहित्य तृतीय- पत्रम्
किरातार्जुनीयम् - महाकाव्यम्
प्रथमः सर्गः

प्र० (U - पद्यमिदम् व्याख्येयम् ।
सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रत्युवाच - दुर्योधनः चिराय प्रजापालनतत्परः सस्यवृद्धयर्थं कृत्रिम-नदी (नहर) प्रभृत्युपायैः सेचनोद्योगं विधाय एवं करोति यत् तत्रत्याः कृषकाः विनाप्रयासेनैव स्वयं जातानीव सस्यानि लेभिरे ।

व्याख्या:- चिराय = बहुत समय से, तस्मिन् = उस दुर्योधन के, क्षेमं वितन्वति (सति) = (प्रजाओं का) कल्याणकारक होने पर, अदेवमातृकाः = जो बादलों के पानी से नहीं जाते ऐसे, कुरवः = कुरुदेश, कृषीवलैः = किसानों द्वारा सुखेन = आसानी से, लभ्याः = पाने योग्य, सस्यसम्पदः = धान्य सम्पत्तियों को, दधतः = धारण करते हुए, चकासति = शोभित हो रहे हैं।

Renu Devi
02/09/20
राधा उमाकान्त सं० महा० वि० सुरसेना, पूर्णिया ।

Page No.

उपशास्त्री-II साहित्य तृतीय-पत्रम्
किरातार्जुनीयम् महाकाव्यम् -प्रथमः सर्गः

प्र०(1) पद्यमिदम् व्याख्येयम् ।
अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति- यदि पराक्रमं निरस्य चिराय शान्तिमेव कल्याणसाधनम् इति मन्यसे चेत् तर्हि राजचिन्हेज्ञानेन धनुषा किम् एतत् परित्यज्य जटां धारयन् अस्मिन्नेव वने मुनिर्भूत्वा होमं कुरु

व्याख्या:- अथ= पक्षान्तरे । (निरस्तः विक्रमो येन सः) निरस्तविक्रमः =(उत्साहहीनः) सन् चिराय= चिरकालेनापि । क्षमां=शान्तिमेव सुखस्य साधनं पर्येषि= अवगच्छसि, तर्हि (लक्ष्म्याः पतिः, तस्य लक्ष्म, तत्) लक्ष्मीपतिलक्ष्म= राजचिन्हं कार्मुकं धनुः विहाय= त्यक्त्वा, धरतीति धरः) पचाद्यच् जटानां धरः जटाधरः सन् । इह= वने । पावकं जुहुधि= पावके होमं कुर्वित्यर्थः। अधिकरणे कर्मत्वोपचारः। विरक्तस्य किं धनुषेत्यर्थेन तुमकल्प्योः हेर्धिः।

Renu Devi
02/09/20
राधा उमाकान्त सं० महावि० सुखसेना
पूर्णिया ।

शास्त्री-II साहित्य

सूक्तिव्याख्याभागः- मेघदूतम् - पूर्वमेघः

Date ___/___/____

प्र० (1) "के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः"॥

उत्तरम् = प्रसंगः - व्याख्या:— इयं सूक्तिः महाकविकालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य पूर्वमेघस्यास्ति। अत्र महाकविः कार्यारम्भं कृत्वा ये केश्चिद् हेतुभिः तत्प्रपूरणेऽक्षमाः भवन्ति ते लोके निन्दाभाजो भवन्तीति वर्णयन्नाह—"के वा न स्युः" इति।

हे मेघ! तव हिमालये शरभाणामुड्डयनमार्गं त्यजन्तमपि भवन्तं लङ्घयितुं ये शरभाः प्रयतेरन्, तान् वर्षोपलैः विक्षिप्तान् विनष्टांश्च कुर्वन् मम सन्देशं यथोक्तं मम विरहिणी पत्नीं प्रापय। यतो हि निष्फलारम्भयत्नाः = विफलकर्मप्रयासाः, के वा = केऽपि जनाः, परिभवपदम् = तिरस्कारपात्रं, न स्युः = न भवेयुः। अर्थात् सर्वेऽपि निष्फलकर्मोद्यमाः जनाः तिरस्कारपात्रत्वं यान्त्येव।

Renu Devi

02/09/20

राधा उमाकान्त सं० महावि० सुखसेना,

पूर्णिया।

Page No.

शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

Saathi

Date __/__/__

प्र०(1) पद्य मिदम व्याख्येयम ।

दर्भांकुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितस्य अभिज्ञान शाकुन्तलम् नाट्यशास्त्रस्य द्वितीय अंकात् उद्धृतोऽस्ति । अस्मिन श्लोके शकुन्तलाया भावाविष्करणप्रकारं वर्णयन् राजा दुष्यन्तो विदूषकं कथयति -

व्याख्या - तन्वी = स्वभावतः कृशाङ्गी शकुन्तला कतिचित् = कानीचित् एव द्विमाण्येव, पदानि = पदप्राप्यस्थानानि गत्वा = चलित्वा, अकाण्डे = अनवसरे एव दर्भस्य = कुशस्य अङ्कुरेण = अग्रभाग सूच्या कुशाग्र- सूचिकया चरणः = मम पादः क्षतः = सव्रणः विद्ध, इत्युक्त्वा = इति हेतुमभिनीय वा विवृत्तवदना = विवृतं = प्रत्यावृत्तं वदनं = मुखं यया सा विवृत्तवदना = वदनं विवृत्य विलोकयन्ती मत्संमुखीना द्रुमाणां = वृक्षाणां शाखासु = स्कन्धेषु, विटपेषु असक्तं = अलग्नम्, असं- बद्धमपि वल्कलं = परिधानीयं वल्कलवस्त्रं, विमोचयन्ती = मन्दंमन्दं मोचनव्यापारमभिनयन्ती, स्थिता = अवस्थिता आसीत् । कुशाग्रभागपादव्यथनाभावेऽपि तद्व्याजेन वल्कलस्य शाखा- स्वनासक्तस्यापि विमोचनच्छलेन निरुद्धगमना स्वाशयं स्पष्ट- मेव प्रकटितवतीति भावः । अत्र विरोधाभासविभावना-हेतु-व्याजोक्ति-स्वभावोक्ति-वृत्तिश्रुति-छेकानुप्रासा अलङ्कारा वसंततिल- कावृत्तं च ।

Renu Devi
02/09/20

राधा उमाकान्त सं० महाविं० सुखसेना, पूर्णिया ।